अस्य चिकित्सा यथा, वैद्यकचिकित्सारत्ने ॥
"दूर्व्वाचव्यं फलं माषकुलत्थौ वंशपत्रिका ।
जलस्थलभवौ कर्णमोरटाखरमञ्जरी ॥
दण्डोत्पलस्य मूलानि क्वाथ्यादष्टगुणेऽम्भसि ।
तत्पादशेषिते तैलं तुलां कृत्वा विपाचयेत् ।
तत्तैलं प्रतिमर्षेण आहत्राख्यं ज्वरं जयेत्" ॥
॥*॥ दूर्व्वाद्यं तैलं ॥*॥)

आहतं, क्ली, (आ + हन् + क्त ।) पुरातनवस्त्रं । नूतनवस्त्रं । इति मेदिनी । म्टषार्थकवाक्यं । इत्यमरः ॥

आहतः, त्रि, (आ + हन् + क्तः ।) गुणितः । ताड़ितः । इति मेदिनी ॥ ("प्रति दिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः"। इति पञ्चतन्त्रम्। ज्ञातः । मिथ्योक्तः । इत्यजयः ॥ निहतः । "द्यूना विंशतिराहता त्वौहिणीनाम्"। इति महाभारतम् ।)

आहतः, पुं, (आहन्यते यः + आङ् + हन् + कर्म्मणि + क्त ।) आनकः । ढक्का । इति मेदिनी ॥

आहतलक्षणः, त्रि, (आहतं अभ्यस्तं लक्षणं यस्य ।) गुणैः प्रतीतः । गुणेन ख्यातः । तत्पर्य्यायः । कृतलक्षणः २ । इत्यमरः ॥

आहरः, पुं, (आङ् + हृ + अच् !) उच्छ्वासः । अन्तर्मुखश्वासः ॥ इति हेमचन्द्रः ॥ (आहरणशीले वाच्यलिङ्ग एव । यथा, रघौ १।४९ ।
"वनान्तरादुपावृत्तैः समित्कुशफलाहरैः" ।)

आहरणं, क्ली, (आङ् + हृ + भावे ल्युट् ।) द्रव्यादानयनं । आसादनम् । यथा । देवीपुराणे ।
"म्टदाहरणसंघट्टप्रतिष्ठाह्वानमेव च ।
स्नपनं पूजनञ्चैव विसर्जनमतःपरं" ॥
इति तिथ्यादितत्त्वम् ॥

आहवः, पुं, (आह्वयते अरिर्यस्मिन् । आङ + ह्वे + अप् ।) युद्धं ।
("यदाश्रौषं भीष्ममत्यन्तशूरम्
हतं पार्थेनाहवेष्वप्रधृष्यम्" ॥
इति महाभारते आदिपर्व्वणि १।१८२ ।
आह्वयते आज्यादिकं यत्र । आङ् + हु + अप ।) यज्ञः । इति शब्दरत्नावली ॥

आहवनीयः, पुं, (आह्वयते आज्यादिरस्मिन् । आङ् + हु + अनीयर् ।) यज्ञाग्निविशेषः । इत्यमरः । गार्हपत्यादुद्धृत्य होमार्थं यः संस्क्रियते सः । इति भरतः ॥ (यथा, मनौ २।२३१ ।
"गुरुराहवनीयस्तु साग्निरेता गरीयसी" ।)

आहारः, पुं, (आङ् + हृ + घञ् ।) द्रव्यगलाधःकरणं । तत्पर्य्यायः । जग्धिः २ भोजनं ३ जेमनं ४ लेपः ५ निघसः ६ न्यादः ७ । इत्यमरः ॥ जमनं ८ विघसः ९ इति तट्टीका ॥ प्रत्यवसानं १० भक्षणं ११ अशनं १२ ॥ इति रत्नमाला ॥ अभ्यवहारः १३ खदनं १४ निगरः १५ । इति राजनिर्घण्टः ॥ अस्य गुणाः । सद्यस्तृप्तिजनकत्वं । बलकारित्वं । देहधारकत्वञ्च । इति राजवल्लभः ॥
("तमुवाच भगवानात्रेयः। हिताहारोपयोग एक एव पुरुषस्याभिवृद्धिकरो भवति। अहिताहारोपयोगः पुनर्व्याधिनिमित्तमिति" ।
"तमुवाच भगवानात्रेयः । यदाहारजातमग्निवेश ! समांश्चैव शरीरधातून् प्रकृतौ स्थापयति, विषमांश्च समीकरोतीत्येतद्धितं विद्धि त्वहितं विपरीतं इत्येतद्धिताहितलक्षणमनपवादम्भवति एवं वादिनञ्च भगवन्तमात्रेयमग्निवेश उवाच। भगवन्नन्वेतदेवमुपदिष्टं भूयिष्ठकल्पाः सर्व्वभिषजो विज्ञास्यन्ति । तमुवाच भगवानात्रेयः । येषां विदितमाहारतत्त्वमग्निवेश ! गुणतो द्रव्यतः कर्म्मतः सर्व्वावयवतो मात्रादयो भावास्तत्र तदेवमुपदिष्टं विज्ञातुमुत्सहेरन् यथा तु खल्वेतदुपदिष्टं भूयिष्ठकल्पाः सर्व्वभिषजो विज्ञास्यन्ति तथैतदुपदेक्ष्यामः । मात्रादीन् भावानुदाहरन्तस्तेषां हि बहुविधविकल्पा भवन्ति । आहारविधिविशेषांस्तु खलु लक्षणतश्चावयवतश्चानुव्याख्यास्यामः । तद्यथा, आहारत्वमाहारस्यैकविधमर्थाभेदात् । स पुनर्द्वियोनिः स्थावरजङ्गमात्मकत्वात् । द्विविधः प्रभावो हिताहितोदर्कविशेषात् । चतुर्विधोपयोगः पानाशनभक्ष्यलेह्योपयोगात् । षड़ास्वादो रसभेदतः षड्विधत्वात्" । इति चरकः ॥
"यदाहारगुणैः पानं विपरीतं तदिष्यते ।
अन्नानुपानं धातूनां दृष्टं यन्न विरोधि च" ॥
इति च चरकः ॥
"प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयाः" ॥
"स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसङ्घातः सुखजरश्च भवति" ।
"आहारः प्रीणनः सद्यो बलकृद्देहधारकः ।
आयुस्तेजःसमुत्साहस्मृत्योजोऽग्निविवर्द्धनः" ॥
इति सुश्रुतः ॥) स त्रिविधः । सात्त्विकः १ राजसिकः २ तामसिकः ३ । सात्त्विकाहारो यथा,—
८ श्लोकः ।
"आयुः-सत्त्व-बलारोग्य-सुख-प्रीति-विवर्द्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः" । राजसिकारो यथा, ९ श्लोकः ।
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः" ॥
तामसिकाहारो यथा, १० श्लोकः ।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" ॥
इति श्रीभगवद्गीता १७ अध्यायः ॥ आहरणं । इति मेदिनी ॥
("स पुनर्दैवयान्योक्तः पुष्प्याहारो यदृच्छया" ।
इति महाभारतम् । आदिपर्व्वणि ७६ । सम्भवपर्व्वणि ७६।३५ ।)

आहारसम्भवः, पुं, (आहारात् सम्भवो यस्य ।) शरीरस्थरसधातुः । इति हेमचन्द्रः ॥

आहार्य्यं, त्रि, (आङ् + हृ + ण्यत् ।) आगन्तुकं । इति त्रिकाण्डशेषः ॥
("आहार्य्यैर्नीयमानं हि क्षणं दुःखेन हृद्यताम्"
इति कामन्दकः ।) आहरणीयं ॥ (यथा, मनुः ८।२०२ । "अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितः" ।) (शस्त्रकर्म्मभेदः । यथा सुश्रुते "तत्र शस्त्रकर्म्माष्टविधं, तद्यथा ;—छेद्यं भेद्यं, लेख्यं वेध्यं एष्यम्, आहार्य्यं, विस्राव्यं, सीव्यमिति" ।
"आहार्य्याशर्करास्त्रिस्रो दन्तकर्णमलास्मरी" ।)

आहार्य्यः पुं, नाट्योक्तौ व्यञ्जकविशेषः । स तु भूषादिना रचितः । इति हेमचन्द्रः ॥ (यथा साहित्यदर्पणे । षष्ठाङ्के ।
"भवेदभिनयोऽवस्थानुकारः स चतुर्व्विधः ।
आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा" ॥)

आहार्य्यशोभा, स्त्री, (आहार्य्यात् या शोभा ।) कृत्रिमशोभा । चित्रभूषादिना कृतद्युतिः । इति जटाधरः ॥ (यथा, भट्टिकाव्ये २य सर्गे,—
"आहार्य्यशोभारहितैरमायैः
ऐक्षिष्ट पुंभिः प्रचितान् स गोष्ठान्" ।)

आहावः, पुं, (आङ् + ह्वे + अप् ॥ निपातनात् वृद्धिः ।) कूपसमीपे पश्वादिजलपानार्थकृतस्वल्पजलाशयः । इत्यमरः ॥ चौवाचा इति भाषा । (आह्वयतेऽरिरत्र इति व्युत्पत्त्या ।) युद्धं । आह्वानं । इति धरणिः ॥ (आहूयतेऽत्र इति आ + हु + अधिकरणे घञ् ।) अग्निः ।)

आहिकः, पुं, (अहिरिव आकृतिर्यस्य । अहि + ठक् ।) पाणिनिमुनिः । इति त्रिकाण्डशेषः ॥ केतुग्रहः । इति हेमचन्द्रः ॥

आहितः, त्रि, (आङ् + धा + क्त ।) न्यस्तः । अर्पितः । स्थापितः । इति हलायुधः ॥
(यथा, किराते ।
"व्यावर्त्तनैरहिपतेरयमाहिताङ्कः" ।)

आहितलक्षणः, त्रि, (आहितं लक्षणं यस्य ।) आहतलक्षणः । इत्यमरटीकायां रमानाथः । गुणादिद्वारा ख्यातः ।

आहिताग्निः, पुं, (आहितः स्थापितोऽग्निर्येन ।) साग्निकः । अग्निहोत्री इति स्मृतिः ॥
("न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः" ।
इति मनुः ३।२८२ । तथा च रघौ २ ४४ ॥
"गुरोरपीदं धनमाहिताग्नेः" ।)

आहितुण्डिकः, पुं, (अहितुण्डेन दीव्यति । अहितुण्ड + ठक् ।) व्यालग्राही । सापुड़िया इति भाषा । इत्यमरः शब्दरत्नावली च ॥ (यथा पञ्चतन्त्रम् ।
"वैद्यसांवत्सराचार्य्याः स्वपक्षेऽधिकृतास्वराः ।
यथाहितुण्डिकोन्मत्ताः सर्व्वं जानन्ति शत्रुषु" ।)

आहुतं, क्ली, (आङ् + हु + क्त ।) गृहस्थानां पञ्चमहायज्ञान्तर्गतयज्ञविशेषः ॥ स तु नृयज्ञः । इति जटाधरः ॥

आहुतिः, स्त्री, (आ + हु + क्तिन् ।) देवोद्देशे मन्त्रोच्चारणपूर्व्वकोऽग्नौ हविर्निक्षेपः । तत्पर्य्यायः । देवयज्ञः २ होमः ३ होत्रं ४ वषट्कारः ५ । इति हेमचन्द्रः ॥ (यथा, रघौ १।५३ ।
"पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः" ।
धर्म्मात् मरुद्वत्यां जातः स्वनामख्यातो मरुद्भेदः ।
यथा हरिवंशे,—
"मरुद्वती मरुत्वन्तो देवानजनयत् सुतान् ।
नहुषं चाहुतिं चैव चारित्रं ब्रह्मपन्नगम्" ।)

आहुल्यं, क्ली, (आङ् + हुल् + क्यप् ।) क्षुपविशेषः तरवट इति काश्मीरादौ ख्यातं । तत्पर्य्यायः ।